१९६८ या पोथी ची पत्रे आहेत ... समग्र ग्रंथ हा आहे

१२

श्रीगणेशाय नमः ॥ श्रीः ॥ लक्ष्मासंलग्नतुलं नवविश्वं तत्त्वात्परूपसारं स्मितिविरूपे ॥ लपंनपत्याश्रुत्य पूर्ण
रूपः शिवं तनोतु शश्वद्विमर्शात्मा ॥ १ ॥ श्रुतिस्मृतीतिहासपुराणजालं तन्त्रज्ञं यानपि संतितथान् ॥

श्रीशंकरस्यात्मजनीलकंठकृतिप्यारवेस्संविदणोति सम्यक् ॥ २ ॥ मत्तारके रामहलसत्रज्ञिचिन्मयान्त
निर्मुक्तलयानत्तुप्तिलं ॥ ऊनोऽतिलानो नहि लेनकाचिन्द्रवसुष्मही नाषचिनिर्नहीयते ॥ ३ ॥ समस्त
निर्मुक्तम् प्रतिथयवस्थां विनाहलं यत्क्षिणयस्यकैरपि ॥ नानोपवैस्त्तद् तिगायणस्पैसिंचग्वरान्त्कण्णै
समंसमंमसलं ॥ ४ ॥ संस्कारापारकागः ग्राह्नीतिविंवाद्दोनंच ॥ अन्यो लग्नयलितप्रायश्चित्तं
विरुद्धिकंशनीच ॥ ५ ॥ तिथिविठ्ठुल्याप्रणातंरंगचा ॥ नजाधारात्कादोप्रतिपत्स्मस्य पः स्वर्गतं दपातेद
वाद्धवेः ॥ संपूर्णाइति विरुधानाहरिवासरवर्जितः ॥ हरिवासरएकादशी ॥ तत्रवेपालरवस्य
ते ॥ तत्तिथिर्वारक्षंग ॥ तस्यावेधसाह पेठीतत्तिः ॥ पक्षांतपेपितिथयस्तिथिं प्रवर्तनयोतरां ॥ त्रिमुहूर्त

ते विधित्संतिसासान्यो दोषविशिकं नरज्ञि ॥ अत्रपूर्वयातिथ्योदयोत्तरयाचोदयात्सर्वंत्रिमुहूर्त यो
वेधोविधीपतेस्तिकैचित्त ॥ तिथ्वध्यंतामुत्सवैषांदिनमध्यत्वव प्रजोत्तरतिथ्योस्तिमुहूर्त योःप्रवे

शेषे वेद्यो ऽभिमतः वक्ष्यमाणशिवरहस्यविष्णुधर्मोत्तरादिवाक्यात्। सर्वथाहोरात्रव्यापगामिनीति
धिः संदिग्धत्वान्निर्णयः। सा च कर्मांगतया विहितैव। न निषिद्धा। तथा च वृद्धगार्ग्यः॥ निमित्तं का
लमारवज्य वृत्तिर्विधिनिषेधयोः॥ विधिः परस्पतिथौ तत्र निषेधः कालमात्रक इति। यत्तु दक्षः॥
त्रिमुहूर्तान्न कर्तव्या या याति तिथिक्षयगामिनी॥ द्विमुहूर्तापि कर्तव्या या याति तिथिर्वृद्धिगामिनीति॥ अत्र
पीशादेस्य पूर्वार्द्धपन्नयान्न त्रिमुहूर्तस्यागे द्विमुहूर्तग्रहणे बलात्प्रवर्त्तितं तु द्विमुहूर्तस्यानुभ
व्रते। अत एव शिवरहस्येपि॥ यामाप्यास्तमुपैत्यर्कः सा वेलस्या त्रिमुहूर्तगा॥ धर्मकृत्येषु सर्वे
षु संपूर्णां तां विदुर्बुधा इति॥ विष्णुधर्मोत्तरे॥ उदिते दैवतं भानौ पित्र्ये चास्तमिते रवौ॥ द्विमुहू
र्तं त्रिरह्नस्य सा तिथिर्हव्यकव्ययोरिति। द्विमुहूर्तं व्याप्त्यलोक्षिरन्तु कात्स्न्यपरान। उदिते भानौ द्वि
मुहूर्तं दैवतं। अस्तमिते अस्तं गंतुमारब्धे। इन्हस्त्रिमुहूर्तं पित्र्यमित्यर्थः॥ अन्ह इति अन्हस्यान्त्य
या दस्तमितमिति आदिकर्मणि क्तः॥ अतोऽपरा॰ यास्तनियमे चरितैकापि यामवेला॥ उदिते
सा तिथिस्तत्र विपरीता तु पैत्र्ये इत्यादीनि यामादिवचनानि तु वेधानराधिकरणन्यायेन

॥२॥

त्रिमुहूर्त्तवेधमेवस्तु वंशीतिमाधवाग्र्यपः। एकादशी परा शीलितु पुत्रकं अंसपादस्त्वौ विसेनस्तु
रुषभः॥ कास्तु चिन्तिधिष्ठ लितेधममयोजक्षो वेधः॥ स्कांदे॥ नागो द्वादशनाडीभिर्दिक् पंचदशभि
स्तथा॥ भूतोष्टादशनाडीभिर्दूषयत्युत्तरां तिथिम्॥ नागः पंचमी॥ दिक् दशमी॥ भूतश्च
तुर्दशी॥ इति वेधः॥ तत्र विहिता तिथिर्भक्तविभागेन बोध्या॥ पूर्वेद्युरेव कर्मकालगा पूर्वे
द्युरेवोभयोर्नोभयोस्तु भयोरंशे न तत्रापि साम्येन वैषम्येण वेति। तत्रान्यतरदिने कर्मका
लगा ~~पूर्वेद्युरेवोभयोर्नोभयोस्तु~~ चेत्सैव ग्राह्या॥ योयस्य विहितः कालस्तत्कालव्यापिनी
तिथिः। तया कर्माणि कुर्वीत ह्रासवृद्धी न कारणमिति गार्ग्योक्तेः। अत एवाहोरात्रसाध्य
उपवासादौ याहोरात्रगा सैव ग्राह्या। तदभावेन्यतरगा। दिवारात्रिव्रतं यच्च एकमेव तिथौ
गतं॥ तस्यामुभययोगिन्यामाचरेत्तद्व्रतं व्रती॥ इति स्मृतेश्च। वैषम्येन कर्मकालस्पर्शे ऽधिका

॥२॥

ग्राह्या। उभयोर्नोभयोः साम्येनैकदेशउभयोरपि व्याप्तौ तु पक्षेषु निर्णयो निगमे। युग्माग्नि
युगभूतानां षण्मुन्योर्वसुरंध्रयोः॥ रुद्रेण द्वादशी युक्ता चतुर्दश्या च पौर्णमा॥ प्रतिपद्य

मा वास्या तिथयो युग्मं महाफलं ॥ एतद्व्यस्तं महादोषं हंति पुण्यं पुराकृतमिति ॥ युग्मं द्वितीया । अग्निस्तृ
तीया ॥ युग्मं चतुर्थी । भूतं पंचमी । षट् षष्ठी । मुनिः सप्तमी । वसुरष्टमी । रंध्रा नवमी । रुद्र एका
दशी । तिथ्योर्युग्मं द्वितीयातृतीया तृतीयायुता तृतीया चतुर्थीयुतेति ॥ एवं चतुर्थीपंचम्यादीनां युग्मानि ।
अत्र दशम्या अपि पूर्वविद्धा ग्राह्या ॥ तथा च स्कांदे ॥ दशमी चैव कर्तव्या सदुर्गा द्विजसत्तमेति । अ
त्र एकादशी पूर्वविद्धा ग्राह्या ॥ त्रयोदशी तु कर्तव्या द्वादशीसहिता मुने इति । यत्तु षष्ठ्यष्टम्यमावास्या
शुक्लपक्षे चतुर्दशी ॥ एताः परयुताः पुण्याः पराः पूर्वेण संयुता इति युग्मवाक्यं तदपि प्येतत्त्वं वा
क्येन । यत्तु प्रतिपत्तु द्वितीयास्या द्वितीया प्रतिपद्युतेति । यच्च चतुर्थी संयुता या च सा तृतीया फ
लप्रदा ॥ चतुर्थी च तृतीयायां महापुण्यफलप्रदेति तदेतद्विषयं ॥ अनयोरस्तु पक्षभेदेन व्यवस्थो
क्ता विष्णुधर्मोत्तरे ॥ शुक्लपक्षे तिथिर्ग्राह्या यस्यामभ्युदितो रविः ॥ कृष्णपक्षे तिथिर्ग्राह्या य
स्यामस्तमितो रविरिति ॥ कर्मकालव्याप्तौ तूपक्रमयायोगस्य विहितकालः अक्रमणात्तूप
क्रमे ॥ विद्यमानाभवे दर्शनोदितोपक्रमेणाविति वचनात् ॥ अयं च युग्मवाक्यकृतो निर्णयो

समप्र०

॥२॥

दैवे एव कर्माणि पित्र्ये तु एवोक्तपक्षेषु । एवं वेदर्पस्तथा हिंसा त्रिविधं तिथिलक्षणं ॥ एवं दर्पौ परोप
ज्योर्हिंसास्यात्पूर्वकालिकी तिथिः रामस्तोणि चैतस्मान्निर्णयः ॥ एवं वेः साम्यो दर्पो वृद्धिः । हिंसा क्षयः ।
एतेन च एववेद्यः केचित्पूर्वतिथ्यपेक्षया साम्यमिति यदेव ॥ कश्चित्त्र्याम्यापेक्षोत्तरतिथेरिति त
त्रत त्र वक्ष्यामः ॥ तथा च निगमे । द्वितीयादिकयुग्मानां परस्परतानियमादिकं ॥ एकोद्दिष्टादिव्यवस्था
दोत्तरासव्यापादिश्चोदने । निगम अन्ना प्रमादिपदं तिथ्यंतराणामुपादानार्थं ॥ द्वितीयं स्कंदेन
कर्मणां ॥ तानि पंपार्वणस्थो । चतुर्थं वृद्धिरादौ येषामित्यलक्षणसंविशानवृकुश्री हिणास्य वदैव
श्राद्धानां ॥ मुख्यं वृद्धिश्राद्धस्य तिथ्यामनुक्ते नत निर्णयानुपयोगः ॥ वृद्धिपदस्व निमित्तकश्राद्ध
लक्षकं ॥ पंचमं साम्यस्य तासव्यादिश्चोदना एव वेदपादिवाक्यमित्यर्थः ॥ यत्तु देवलः ॥ यां ति

॥३॥

थिं समनुप्राप्य अस्तं याति भास्करः ॥ सा तिथिः सकला ज्ञेया स्नानदानजपादिषु ॥
यवस्त्वादे ॥ यां तिथिं समनुप्राप्य यात्यस्तं पश्चिमे रविः ॥ सा तिथिः सकला ज्ञेया दानाध्ययन
कर्मसु ॥ इति तत्पूर्वोत्तरग्राह्यत्वसाधकानां युग्मस्य वेदं स्कन्दादि वचसां उपो

उदयं याति भास्करः ॥ १

वृत्तकं ॥ एतदपवादः स्कांदे ॥ सन्ध्यादौ च युगादौ च ग्रहणे चंद्रसूर्ययोः ॥ व्यतीपाते वैधृतौ च नक्षत्रा

ऽव्यापिनी क्रिया ॥ अभ्यंगे चोदधिस्नाने दंतधावनमैथुने ॥ जाते च मरणे चैव तत्कालव्यापिनी

तिथिरिति विज्ञेया व्यवस्था ॥ अन्ये तु सामान्यतो विभागमाहुः ॥ व्यासः ॥ मुहूर्त्तत्रितयं प्रा

तस्तावान्नेव तु संगवः ॥ मध्याह्नस्त्रिमुहूर्त्तः स्यादपराह्णोपि तादृशः ॥ सायाह्नस्त्रिमुहूर्त्तः स्या

त्सर्वकर्मबहिष्कृत इति ॥ पूर्वाह्णमध्याह्नापराह्णमिति त्रेधा विभागस्य क्वचित् । पूर्वाह्णापराह्ण

इति द्वेधा विभागस्य च पर्वनिर्णयादौ उपयोगो वक्ष्यते ॥ ॥अथैकभक्तं ॥ देवलः ॥ दिनार्द्धसम

येतीते भुज्यते नियमेन यत् ॥ एकभक्तमिति प्रोक्तमतस्तत्स्याद्दिवैव तु ॥ दिनार्द्धं त्वत्र सामान्य

तोपयुक्तः कालो मध्याह्नांतावधिरेव ॥ मध्याह्नव्यापिनी ग्राह्या एकभक्ते व्रते तिथिरिति बोधा

यनोक्तेः ॥ अत्र पूर्वोक्तषड्भागपक्षे पंचदशदिने एकभक्तकालव्याप्त्यनधिकस्य शेषोत्तरा । यथा पूर्वे

द्युर्गौणकालेपि सत्वादिति माधवाचार्यः ॥ ॥अथ नक्तं ॥ ॥ व्यासः ॥ त्रिमुहूर्त्तं प्रदोषः स्या

द्भानावस्तंगते सति ॥ नक्तं तत्र प्रकुर्वीत इति शास्त्रस्य निश्चयः ॥ यत्तु सायं संध्या त्रिघ

४ ब्रंणात्॥ उपवासः प्रणश्येत दिवास्वापाच्च मैथुनात्॥ अष्टाक्षीरलवे॥ असकृज्जलपानेन ताम्बूलास:
प्रनश्यतीति॥ असकृत्प्राणायामे॥ चतुर्वर्गचिन्तामणौ॥ उपवासेन पात्राद्यं न कुर्याद्दन्तधावनं॥ दन्तानां काष्ठसं
योगो हन्ति सप्त कुलानि वै इति॥ पैठीनसिः॥ अलाभे दन्तकाष्ठानां निषिद्धे वा काष्ठानां दन्तधावने॥ पर्णादिना वि
शुद्धेन जिह्वोल्लेखः सदैव च॥ व्यासः॥ अलाभे दन्तकाष्ठानां निषिद्धायां तथा तिथौ॥ अपां द्वादश
गण्डूषैर्विदध्याद्दन्तधावनं॥ विष्णुरहस्ये॥ ब्रह्मचर्यं तथा शौचं सत्यमामिषवर्जनं परिकीर्तितं॥ अन्यस्य वर्ज
येत्सर्वं ग्रासानां वर्जयेत् ग्रहणं॥ गात्राभ्यङ्गं शिरोऽभ्यङ्गं ताम्बूलं चानुलेपनं॥ व्रतस्थो वर्जयेत्सर्वं यच्चा
न्यद्बलरागकृत्॥ मैथुनं चाष्टाङ्गं॥ तथा च स्मरणं कीर्तनं केलिः प्रेक्षणं गुह्यभाषणं॥ संकल्पोऽध्यवसायश्च
क्रियानिर्वृतिरेव च॥ एतन्मैथुनमष्टाङ्गं प्रवदन्ति मनीषिणः॥ देवलः॥ स्त्रीणां तु प्रेक्षणात्स्पर्शात्ताभिः सङ्क
थनादपि॥ निपतत्येव ब्रह्मचर्यं न दारेष्वनुसंगमादिति॥ स्वदारे ऋतुसंगमादिति विज्ञेयं॥ विष्णुधर्मोत्तरे।
तस्मात्पत्रं पुष्पं धान्यं ताम्बूलं चर्वणादिकं॥ न दर्शनं च नान्यासां कीर्तनं श्रवणादिकं॥ उपवासकृतां त्याज्यं गुणाः
प्रोक्ता मनीषिभिः॥ तथा देवो पारम्पर्येण ताम्बूलं दद्यान्न वा॥ देवलः॥ ब्रह्मचर्यमहिंसा च सत्यमामिषवर्जनं

पुरुषोथ स्नमास्तु रवीस्यात् ।। पंचदशमलीलायां प्रातरिसर्थः ।। येपि वेति वसेला ये च तत्र यंस
चंदनं ।। स संतल्पस्य फामस्य प्रज्वनं क्षिपते नरैरिति ।। मांविष्णो नरात् । वसंताय चैत्रमतिप
दि ।। मंत्रः ।। नूतनमग्यं वसंतस्य माकंदकुसुमं नव ।। सचंदनं पिबाम्यद्य सर्वकामार्थसिद्धये ।
मंविष्णो नरे । ततः प्रातर्द्वितीयायां उत्तमिनादिसंकुलः ।। नृपतिर्विजलने देशे विनान वर
रोभिते । उपविश्यासने रम्ये पौरजानपदैः सह ।। सिंदूरकुंकुमक्षोदपटवासैः सचंदनैः ।।
विविक्तीर्णतो भांसलां मृगैः संमानं च पथक् पथक् ।। नृत्यगीतविनोदेन कर्पूरकामसहो
त्सवं ।। एवं कुर्वन्न चाप्नोति यावत्संवत्सरं सुखमिति । इदं पूर्वविद्धायामेव । वत्सरादौ व
संतादौ बलिराज्ये तथैव च ।। पूर्वविद्धैव कर्तव्या प्रतिपत्सर्वदा बुधैरिति । तद्वसिष्ठा । व्यास
येनेसृष्ट्वप्रतिपदि पिवत्सरारंभे उदयव्यापिनी स्यात् ।। नक्तं माधवीये प्राक्तो । चैत्रे मा
सि जगद्ब्रह्मा ससर्ज प्रथमेहनि ।। शुक्लपक्षे समग्रं तु तदा सूर्योदये सतीति । दिन
द्वये उदयव्याप्ता पूर्वाग्राह्ये वा पूर्वैव । पूर्वोक्तवृद्धवसिष्ठवाक्यात् । तत्रैव गर्भगर्गः स्लोके

समय

॥१८॥

विधिना यस्तु धर्मकर्मं प्रयत्नात्प्रपादयन् फलं सोऽपि प्राप्नोत्यभीष्टं न संशयः इति ॥ ज्येष्ठशुक्लप्रतिपदादि
राहस्यारंभः ॥ काश्मीरखण्डे ॥ ज्येष्ठे मासि सिते पक्षे प्राप्य प्रतिपदं तिथिं । दशाश्वमेधिके स्नात्वा मुच्यते
सर्वपातकैः ॥ एवं सर्वासु तिथिषु क्रमशः प्राचीनरीतितः ॥ आश्वयुक्पक्षे दशम्यां प्रतिजन्मा यमुनास्नाने
दिति ॥ आश्विनशुक्लप्रतिपदि नवरात्रारंभः । तदुक्तं हेमाद्रौ भविष्ये ॥ आश्विने मासि शुक्ले तु कर्त
व्यं नवरात्रकं ॥ प्रतिपदादिक्रमेणैव यावच्च नवमी भवेत् । अत्र पूर्वाह्णव्यापिनी ग्राह्या ॥ आश्विन
स्य सिते पक्षे नवरात्रमुपोषितः ॥ शुक्लान्नक्तैकभक्तेन पूर्वाह्णे प्रजपेच्च विधिवत्प्रतिदिनं देवीपूजनं ॥ तस्य
कर्मकालत्वात् ॥ कर्मणो यस्य यः कालस्तत्कालव्यापिनी तिथिः । इत्यनेन कर्मकालव्यापि
त्वात् तथैव कर्मणः कर्तव्यत्वाच्चैत्यैः ॥ नवरात्रोपवासान्तु यो येन निर्णयः । तस्मान्नवरात्रमुपोषितः

॥५॥

प्रजपेदित्यादिदेवीपूजाया दैनं स्वानि निवर्तनानि स्नानीयादि ग्रन्थे कलिसंस्कारतैलगंधा
द्यावगमात् । अतः प्रधानस्नानपूजाकाले पूर्वाह्णव्यापिन्येव निर्णयः ॥ पूजायां तु प्राधान्यं फ
लसंबंधात् ॥ स च स्कांदे ॥ आश्विने मासि संप्राप्ते सहि पाक्षुर मर्दिनी । देवी संपूज्य पितॄ

सम०पृ०

लनः फलौ स्तंभ वस्त्रादिमंडितेगृहे चतुरस्र हस्तवेदिकोपरि सर्वतोभद्रादिमंडलं विधाय तत्र मही द्यो
दिसादिवर्णप्रजां तं पूजयेत् संस्थापयेत् ॥ सोवर्णादि प्रतिमा पूजार्थं प्रथमं मंडलं अंगस्येति देवी
पुराणात् ॥ मृन्मयादि प्रान्तुक जरास्य पञ्चादास नेस्या प्याग्नेदिकोणे प्यपि चत्वारः कलशा स्था
प्याश्चत्वारः कलशा न्यस्तु द्वा देवगृहे नरः । चतुः समुद्रनामानं सतुरंकेनवस्तु धरामिति वि
प्रधर्मोत्तरात् ॥ प्रतिमा च हेमादिमयी देवी पुराणात् ॥ हेमरजतताम्र प्रानुशैल चित्रार्पितापि वा ॥
रखड्ग शूल चिन्तादेवी सर्व काम फलप्रदा ॥ स्व न्यौ प्रतिमां कलाविनेवा वस्तु पूजयेत् ॥ आत्मवि
त्तानुसारेण सप्तमेन्नौ किं फलमिति प्रतिमा लक्षणं मत्स्यपुराणे ॥ जटा जूट समायुक्ता मर्द्धेन्दु कृ
तलक्षणा ॥ लोचनत्रय संयुक्तां पूर्णेन्दु सदृशाननां ॥ अतसी पुष्पवर्णाभां सुप्रतिष्ठां सुलोचनां ॥
नवयौवन संपन्नां सर्वाभरणभूषितां ॥ सुचारुदशनां तद्वत्पीनोन्नत पयोधरां ॥ त्रिभंग
स्थान संस्थानां महिषासुर मर्दिनीं ॥ त्रिशूलं दक्षिणे दद्यात्खड्गं चक्रं क्रमादधः ॥ तीक्ष्णबाणं
तथा शक्तिं वामतो विनिवेशयेत् ॥ खेटकं पूर्णचापं च पाशमंकुशमूर्ध्वतः ॥ घंटां वा परशुं

॥११०॥

॥१०॥

समयम.

॥१२॥८

नामभिर्वैशांस्तथास्य प्रशान्तिरस्तवः॥ अथवा कुनौ केन किमेतेन वरानमे॥ चं स्याः शान्ताय नि

पाठान्सर्वाः सिध्यंति सिद्धुपद्मलि। पाठं तु नारायणाश्च मत्स्यपुराणे। नारायणं नमस्कृत्य

नरं चैव नरोत्तमं॥ देवीं सरस्वतीं व्यासं ततो जयमुदीरयेदिति वचनात् जयशब्दार्थस्तु

भविष्यत्पुराणे। अष्टादशपुराणानि रामस्य चरितं तथा॥ विष्णुधर्मादिशास्त्राणि शिव

धर्माश्च भारत। कार्ष्णं च पंचमो वेदो यन्महाभारतं स्मृतं॥ शौवाश्च धर्माः राजेन्द्र मानवो

क्ता महीपते। जयेति नाम एतेषां प्रवदंति मनीषिणः॥ पाठप्रकारश्च मात्स्ये। प्रण

वं चादितो जप्त्वा स्तोत्रं वा संहितां पठेत्। अंते च प्रणवं दद्यादन्यथा निष्फलं भवेत्॥ एवं ह

नानेन्यायेन पठितव्यं प्रयत्नतः। नकार्यो सर्वमनसा कार्यो स्तोत्रस्य वाचने॥ आधा

रस्था पाणिस्था तु पुस्तकं स्यान्न पेत्तु धीः। हस्तसंस्थापनादेव यस्मादल्पफलं लभेत्। स्व ॥१२॥

यं तु लिखितं यच्च [illegible] तिलिखितं च यत्। अब्राह्मणेन लिखितं तच्चापि वि

फलं भवेत्॥ [illegible] ॥ नन्दुपराणीस ... ऋषिछंदादिकं न्यस्य पठेत्स्तोत्रं विचक्षण

क्षणं। संकल्पितेन स्तोत्रपाठे संख्यां कृत्वा पठेत्सुधीः। अध्यायं प्राप्य विरमेन्न तु मध्ये कदाचन। कृते वि
रामे मध्ये तु अध्यायादिं पठेत्पुनरिति। अवर्णो वर्णात्ब्राह्मणादेर्बलिकार्ये। ब्राह्मणं वाचकं विधायान्य
वर्णजमादरात्। कृत्वान्यवर्णजातान्वाचकान्नरकं व्रजेत्। भविष्यत्पुराणात्। यदपि देवीपुरा
णे जपहोमादिकं शूद्रोऽपि समस्तमुक्तं तथापि अष्टम्यां नवम्यामेव कार्यः। ब्रह्मपुराणे। तत्राष्टम्यां
मद्यमांसोपचारैर्होमैर्ब्राह्मणतर्पणैः दिनद्वयमेव कृत्स्नं पाठात्। नवम्यां बलिदानं च कु
र्यात् पंचैव यथाविधि। जपं होमं च विधिवत्कुर्यात्तत्र विभूतये। इति कालिकापुराणात्। शिष्टाचा
राच्च। बलिदानमप्यष्टम्यां न नवम्यां देव। पुनः पुत्रान्न भार्यां विहायेन समाचरेत्। नागरैश्च स
र्वं कुर्याद्बलिदानं तथा निशि। नवम्यां बलिदानं च नवम्यां विधिवच्चरेत्। इति कालिकापुराणात्।
अत्र यद्यपि शिष्टपरिगृहीतकालिकापुराणादिषु मद्यस्वगात्ररुधिरप्रदानादिकमुक्तं।
तथापि ब्राह्मणस्य न भवति। मद्यं दद्यात् ब्राह्मणस्तु ब्राह्मण्यादेव हीयते। स्वगात्ररुधिरं दुग्धं
शतमहत्या प्रमवाप्नुयादिति कालिकापुराणात्। एवमन्यत्र भाष्य। सात्विकी जपयज्ञाद्यैर्नैवे

पत्रिकापूजा कर्तव्या नवरात्रकैः ॥ प्रशस्तां सप्त॰ ं वि॰ वशात्स्वामान्द्स पूजयेदिति ॥ अथवो

पनप्रकारमस्तकं क ॥ लिङ्गपुराणे ॥ कन्यायां कृष्णपक्षे तु पूजयित्वाद्गमे दिवा ॥ नवम्यां बोध

येद्देवीं महाविभवविस्तरैः ॥ भविष्ये ॥ षष्ठ्यां वि॰ बिल्वतरौ बोधं सायंसंध्यासु कारयेत् ॥ देवीपुरा

णे ॥ ज्येष्ठानक्षत्रयुक्तायां षष्ठ्यां वि॰ ॥ आमन्त्रणं ॥ वि॰ बन्धसायनमष्टमि वि॰ बनरूं संप्रप

वि॰ बल्वसैन पत्रीषा दिदुर्गे रक्षाज्येष्ठा दि चतुर्गासा वास्य पूजयित्वा गीलवाच घोषपुरः स

रं देवीं बोधयेत् ॥ मन्त्रस्तु ॥ रावणस्य वधार्थाय रामस्यानुग्रहाय च ॥ अकाले ब्रह्मणा बोधो

देव्यास्त्वयि कृतः पुरा ॥ इषे मासि सिते पक्षे नवम्यां मार्गयोगतः ॥ श्रीवृक्षे बोधयामि त्वां या

वत्पूजा कृता मया ॥ इति ॥ ततो वि॰ बनरो रामन्त्रणं ॥ मन्त्रस्तु ॥ मेरुमन्दरकैलासहिमवच्छि

खरे गिरौ ॥ जातः श्रीफलवृक्ष त्वमम्बिकायाः सदा प्रियः ॥ श्रीशैलशिखरे जातः श्रीफल

श्रीनिकेतनः ॥ नेतव्योसि मया वृक्ष पूज्यो दुर्गास्वरूपतः इति ॥ अपरेद्युः पुनरपि संप्रप

कृतांजलिः प्रसादयेत्॥ किं च वृक्षमूलस्य [illegible] भाग सर्वतारां कदम्बिप॥ गृहीतानव शाखां तु दुर्गा पूजां
करोम्यहं॥ धारणात् [illegible] यामिनी सर्वं न च कार्यं त्वया विभो इति॥ ततः पूजयन्तु ताम पराजिता दिग्गता
मे कां [illegible] दयेद्धानस्य सेन मंत्रेण॥ छिन्धि छिन्धि फट् ॐ हूं फट् स्वाहेति मंत्रः॥ ततः शाखां गृहे आ
नीय बिल्वशाखायां न स्थापयित्वा बिल्वशाखायां सन्मय प्रतिमायां च देवीमावाहनपुरः
सरं पूजयित्वा माषभक्तादि बलिं च दत्वा दिनान्तरे दिनाशाखां प्रतिमां च पूजागृहे द्वारदेशे स्थाप
यित्वा माषभक्तादि बलिं च दत्वा पूजागृहस्थानि स्थानि भूतेभ्यो नमः इति गंधादिभिः संपूज्य।
भूताः प्रेताः पिशाचाश्च ये वसन्त्यत्र भूतले॥ ते गृह्णन्तु मया दत्तो बलिरेष प्रसाधितः। पूजितागंध
माल्याद्यैर्बलिभिस्तर्पितास्तथा॥ देशादस्माद्विनिःसृत्य पूजां पश्यन्तु मत्कृतां॥ भूतेभ्य एष मा
षभक्त बलिर्नमः इति बलिं दत्वा॥ अपसर्पन्तु ये भूता ये भूता भुवि पालकाः॥ भूतानामविरोधेन दु

र्गाकर्म करोम्यहं॥ इति तिलान्यपसारयेत्॥ स्थितेषु लग्न भूतेषु मैवे यं मंडलं तथा। विघ्नं कुर्वन्ति म

॥१५॥

स॥ बलिं च दद्यात् । ततमेव समल्लक्ष्म्यां मिति देवी प्रजनं विशेषतस्त्वं भैरवोऽगारणं चारा आ
त्रिविज्ञय काले । भैरवो विशेष प्रजापर्व कं बलिं दद्यात् । नदर्श नाभि नीरो वेविजयार्थं तपो जपं ।
तं वादं कृतानां पे लंगं पध्य पस्म वर्षितं ॥ विधि वक्तालि मालीनिन तारक तेन यानवे कृदि । पं
चाद्यं महि विमसं णां । नवै वा रात्र्यादि पूजनं च कृपाक् । महाल व माने व ष्ट्या बलि दानं ति मवा ।
तेमसे तत्त्वु स्वां नीत्रां दि । अनेनैव तु मंत्रेण जपहोमादिकारयेद् मिदेवि तु राज्ञातार्द्र कंचन
वैमोकं । पूजयेति नवै मेध दधि क्षीर पयसादि मिश्रितं । केपि तु मासि त्तो कं च त्रुटया स्याव
सेतित संविधि तेनिर हृदयमं पंच पंचमा स्त । स्त ह स्तानीरत्न वेनमासि तो कैलि नस्य विमिश्र पाय
से नहोमं कुर्यात् । रात्रा लब्धपीडरां नये देवनपूजा पि कार्या । सच वड पणा रूपा या मुख बां
स्य पूर्णं स्पन्नो यानि मणा धिपतिः । पूजा मंत्रः श्री शिहोत्रो । नमो देवाधि देवाय पन्नुतंग वरचा
रिणे राक्षस सर्वभूता वदेवा य पन्नुरंग माहिता पचा नुरंग पति सं पस्य नगजो परिधाव मि । सा

॥१६॥

॥२॥

॥२॥

त्रिति। तद्योप्याः सेव भीयास्तिति। कार्तिके शुक्लद्वितीयायां यमद्वितीयोच्यते। सा पराह्णव्यापिनी ग्राह्या। कार्त्ते

कशुक्लपक्षे तु कुशे स्नानादि। ऊर्जे शुक्लद्वितीयायामपराह्णेऽर्चयेद्यमं॥ स्नानं कृत्वा भानुजायां यम

लोकं न पश्यति। ऊर्जे शुक्लद्वितीयायां पूजितः तर्पितो यमः॥ वेष्टितः किंनरैर्हृष्टैस्तस्मै यच्छति

वांछितं। भविष्ये। कार्तिके शुक्लपक्षस्य द्वितीयायां युधिष्ठिर। यमो यमुनया पूर्वं भोजितः

स्वगृहेऽर्चितः॥ अतो यमद्वितीयेयं त्रिषु लोकेषु विश्रुता। अस्यां निजगृहे विप्र न भोक्तव्यं

ततो नरैः। स्नेहेन भगिनीहस्ताद्भोक्तव्यं पुष्टिवर्धनं॥ दानानि च प्रदेयानि भगिनीभ्यो विशेषतः स्वर्णालंका

रवस्त्राग्र्यपूजासत्कारभोजनैः। सर्वा भगिन्यः संपूज्या अभावे प्रतिपन्नकाः। तस्य स्थानीयाः ब्रह्मांडेऽपि यातु

भोजयते नारी भ्रातरं युग्मके तिथौ। अर्चयेच्चापि तांबूलैर्न सा वैधव्यमाप्नुयात्॥ भ्रातुरायुःक्षयो राजन्

न भवेत्तत्र कर्हिचित्॥ ॥इति द्वितीयानिर्णयः॥ अथ तृतीयां सा तु परैवोक्ता विद्धा तु धर्मोत्तरे॥ एका

दश्यष्टमी षष्ठी पौर्णमासी चतुर्दशी। अमावास्या तृतीया च ता उपोष्याः परान्विताः॥ रंभाव्रते तु पूर्वैव।

७२

नदुक्तं ब्रह्मवैवर्ते। रंभाख्यां वर्जयित्वैकां तृतीयां द्विजसत्तम। अन्येषु शुभकार्येषु गणयुक्ता प्रशस्यते इति। ग
णाभ्यनुधी। चैत्रशुक्लतृतीयायां दोलोत्सवो एमार्चनचेद्रिकायां गारुडे। मध्ये शुक्लतृतीयायां जानकीरमणं प्र
भुं। राजोपचारैः संपूज्य मासं मां दोलयेल्लौ। दक्षिणाभिमुखं देवं दोलमानं सुरेश्वरं। सुपूजितं सकृ[illegible]
दृष्ट्वा सर्वपापैः प्रमुच्यते। चैत्रे मासि सिते पक्षे तृतीयायां रमापतिं। दोलारूढं समभ्यर्च्य मासमां दोलयेत्क
लौ। दोलारूढं प्रपश्यंति ये कृष्णं मधुमाधवे। अपराधसहस्रैस्ते मुक्तास्तेनात्र संशयः। दोलारूढस्य देव
स्याग्रे कुर्वंति जागरं। सर्वेषु एव फलानां तिथिर्भिभिषेभिर्भवेत्। इयमेव गौरीतृतीयोच्यते। तत्र मु
हूर्तमात्रापरयुतापि ग्राह्या। वचनं त्वग्रे वक्ष्यते। मदनरत्ने स्कांदे विशेषः॥ तृतीयायां यजेद्देवीं शंकरे
णसमन्वितां। कुंकुमागरुकर्पूरमणिवस्त्रसुगंधकैः। स्रग्गं[illegible]धूपदीपैश्च दमनेन विशेषतः। आं
दोलयेत्ततो वत्स शिवोमातुष्टये सदा। वैशाखशुक्लतृतीयायां त्रिलोचनयात्रा कार्या काशीखंडे।

शं। अश्रुकृतं तृतीयायां स्नात्वा पैलिप्पिलेह्रदे। संतर्पयेत् पितॄन्देवान् त्रिलोचनमथार्चयेदिति॥
इयमेवाक्षय्यतृतीयोच्यते। तदुक्तं भविष्ये। यालेख्या कुरुशार्दूल वैशाखे तु महातिथिः। तृतीया
साक्षया लोके गीर्वाणैरभिवंदिता। यत्किंचिद्दीयते दानं स्वल्पं वा यदि वा बहु। तत्सर्वमक्षयं य
स्मात्तेनेयमक्षया स्मृता। इयमेव युगादिः। सा पूर्वाह्णव्यापिनी ग्राह्या। तदुक्तं नारदीये। द्वे शुक्ले
द्वे तथा कृष्णे युगादी कवयो विदुः। शुक्ले पौर्वाह्णिके ग्राह्ये कृष्णे चैवापराह्णिके इति। अत्र विशेषो
देवीपुराणे। तृतीयायां तु वैशाखे रोहिण्यर्क्षे प्रपूज्य च। उदकुंभप्रदानेन शिवलोके महीयते। क

लशदानमंत्रस्तु। एष धर्मघटो दत्तो ब्रह्मविष्णुशिवात्मकः। अस्य प्रदानात्तृप्यंतु पितरोपि पिता
महाः। गंधोदकतिलैर्मिश्रं सान्नं कुंभं सदक्षिणं। पितृभ्यः संप्रदास्यामि अक्षय्यमुपतिष्ठतु इति।
एतदसंभवे तिलतर्पणं कार्यमित्युक्तं॥ तत्रैव विष्णुपुराणे॥ पानीयमप्यत्र तिलैर्विमिश्रं दद्यात्पि
तृभ्यः प्रयतो मनुष्यः। श्राद्धं कृतं तेन समासहस्रं रहस्यमेतन्मुनयो वदंति।

२३

...तीति। तथात्र मलमासे सति विशेषश्चंद्रिकायां। यौगादिकं मासिकं च श्राद्धं चापरपक्षि
कं। मन्वादिकं तैर्थिकं च कुर्यान्मासद्वयेऽपि च। अपरपक्षो नाम कृष्णपक्षोऽत्र गृह्यते। मलमासे महाल
यनिषेधात्। ज्येष्ठशुक्लतृतीयारंभा तृतीयोच्यते। सा पूर्वा ग्राह्या। तदुक्तं माधवीये स्कांदे। वृहत्त
पा तथारंभा सावित्री वटपैतृकी। कृष्णाष्टमी च भूता च कर्त्तव्याः संमुखी तिथिः इति। संमुखी
नाम सायाह्नव्यापिनी इत्यर्थः। ब्रह्मवैवर्तेपि। रंभाख्यां वर्जयित्वैकां तृतीयां द्विजसत्तम। अन्येषु
शुभकार्येषु गणयुक्ता प्रशस्यते इति गणश्चतुर्थी। भाद्रकृष्णतृतीयायां विशालाक्षीयात्रो
क्ता काशीखंडे॥ भाद्रकृष्णतृतीयायामुपवास[illegible]परैर्नरैः॥ कृत्वा जागरणं रात्रौ वि
शालाक्षीसमीपत इति॥ अत्र रात्रिव्यापिनी ग्राह्या॥ रात्रौ जागरणविधानात्। भाद्रशुक्लतृतीया
हरितालिकोच्यते। सा मुहूर्त्तमात्रापि परयुता ग्राह्या। तदाह माधवः। मुहूर्त्तमात्रसत्वेपि दिने
गौरीव्रतं परे। शुद्धाधिकायामप्येवं गणयोगप्रशंसनादिति। चतुर्थीवीये आपस्तंबः। चतुर्थी

२३

८

साहिता या तु सा तृतीया फलप्रदा। अवैधव्यकरी स्त्रीणां पुत्रपौत्रप्रवर्द्धिनी। द्वितीयायोगे प्रसवाय म
ध्याह्नसंगवे द्वितीया शेषसंयुक्तां या करोति विमोहिता। सा वैधव्यमवाप्नोति प्रवदंति मनीषिण इति॥
आश्विनशुक्लतृतीयायां ललितादेव्या यात्रोक्ता काशीखंडे। इषशुक्लतृतीयायां ललितां प्रतिपू
ज्य वै॥ नारी वा पुरुषो वापि लभते वांछितं फलमिति तृतीयानिर्णयः॥ ॥अथ चतुर्थी॥ सा
परविद्धा ग्राह्या॥ युग्माद्भूतानामिति युग्मवाक्यात्। माधवीये बृहद्वसिष्ठोऽपि॥ एकादशी तथा ष
ष्ठी अमावास्या चतुर्थिका॥ उपोष्याः परसंयुक्ताः पराः पूर्वेण संयुता इति। सर्वासु चतुर्थीषु ढुं
ढियात्रोक्ता काशीखंडे॥ कुर्यान्महति चतुर्थी ह यात्रा विघ्नेशितुः सदा॥ ब्राह्मणेभ्यस्तदुद्देशाद्देया
वै मोदका मुदे सि॥ लैंगे। अंगारकचतुर्थ्यां येस्तावो नरवदांभस्ति। अभ्यर्च्यांगारकेशानं नम
स्यंति नरोत्तमाः। न तेषां ग्रहपीडा च कदाचित्क्वापि जायते। नागचतुर्थी तु मध्याह्नव्यापिनी प
रविद्धा ग्राह्या॥ तदाह देवलः। युगं मध्यंदिने यत्र तत्रोपोष्य फणीश्वरान्॥ क्षीरेणाप्याय्य पंच

ष्यां पूजयेत्सम्यक्ततो नरः इति॥ युगं चतुर्थी॥ विनायकव्रते तृतीयायुतैव॥ तदुक्तं तत्रैव॥ चतुर्थी तु तृती
यायां महापुण्यफलप्रदा॥ कर्त्तव्या व्रतिभिर्वत्स गणनाथसुतोषिणी इति अमांतमानेन श्रावणपाह
द्यचतुर्थी संकष्टचतुर्थीत्युच्यते॥ सा चंद्रोदयव्यापिनी ग्राह्या॥ तदुक्तं स्कांदे॥ श्रावणे बहुले प
क्षे चतुर्थ्यां च विधूदये॥ तस्मिन्दिने व्रतं कार्यं संकष्टाख्यं सुरेश्वरी इति॥ दिनद्वये चंद्रोदयसत्वे अ
सत्वे वा पूर्वैव॥ मातृविद्धा गणेश्वर इति वचनात्॥ भाद्रशुक्ले चतुर्थ्यां बहुलाव्रतं॥ तत्पूर्वैव॥
तदुक्तं गोविंदार्णवे पुराणसमुच्चये॥ गोधा चतुर्थी वटधेनुपूजा दुर्गा च नंदा भरहोतिके च॥ व
त्सस्य पूजा शिवरात्रिरेताः परान्विता घ्नंति नृपं सराष्ट्रमिति गोधा गौरीव्रतसंबंधिनी चतुर्थी॥
हुच्यते॥ वटसंबंधिनी पंचदशी॥ धेनुपूजा तत्संबंधिनी बहुला चतुर्थी॥ वत्सस्य पूजा वत्सद्वादशी॥
भाद्रशुक्लचतुर्थी वरदचतुर्थ्युच्यते॥ तत्र व्रतं पुराणांतरे॥ सुरासुराणां बुबलीगणेशं भ
क्तिपूर्वकं॥ तस्यां प्रसादं दुर्यस्मात्तस्माद्वरचतुर्थिकेति॥ सा मध्याह्नव्यापिनी पूर्वविद्धा ग्राह्या॥ पूर्वदिने

मध्याह्नव्याप्त्यभावे परैव ॥ तदुक्तं माधवीये बृहस्पतिना ॥ चतुर्थी गणनाथस्य मातृविद्धा प्रशस्यते ॥
मध्याह्नव्यापिनी चेत्स्यात्परतश्चेत्परेऽहनीति ॥ स्मृत्यंतरेपि ॥ मातृविद्धा प्रशस्ता स्याच्चतुर्थी गण
नायके ॥ मध्याह्ने परतश्चेत्स्यान्नागविद्धा प्रशस्यत इति ॥ सिद्धिविनायकेपि मध्याह्नव्यापिनी ग्रा
प्रा.क.: ह्या ॥ शुक्लतिलैः स्नात्वा मध्याह्ने पूजयेन्नृपेति पूजायास्तत्कालत्वात् ॥ उभयदिने मध्याह्नव्याप्त्यभावे व्याप्ति
सत्त्वे वा पूर्वैव ॥ मातृविद्धा प्रशस्यत इति वाक्यात् ॥ इयं चरविभौमाभ्यां युक्ता महती स्मृच्यते ॥ तदुक्तं गोविं
३ द्रार्णवाराहे ॥ भाद्रे शुक्लचतुर्थी या भौमेनार्केण वा युता ॥ महती सात्र विघ्नेशस्यार्चयेत्तं लभेन्नर इति ॥
अस्यां चंद्रं न पश्येत् ॥ तदाह तत्रैव मार्कंडेयः ॥ भाद्रे मासि सिते पक्षे चतुर्थी स्वातियोगिनी ॥ मिथ्याभिश
पं कुरुते दृष्टचंद्रा न संशयः ॥ पराशरोपि ॥ कन्यादित्ये चतुर्थ्यां तु शुक्ले चंद्रस्य दर्शनं ॥ मिथ्याभिदूषणं
कुर्याद्रात्रौ पश्येन्न तं सदा ॥ अत्र रात्रिग्रहणाद्दिवा दर्शने न दोष इति ॥ रात्रावेव चंद्रप्राधान्यात् ॥ तद्दो
षशांत्यर्थं तत्रैव पुराणांतरे ॥ ततश्चतुर्थ्यां रात्र्यां यो प्रमादाद्वीक्ष्य मानवः ॥ पठेत्पौराणिकं वाक्यं प्रा

२५

अश्रुसोवाप्युदश्रुस्वः॥ सिंहः प्रसेनमवधीत्सिंहो जांववता हतः॥ सुकुमारकुमारोदीस्तव ह्येषः स्यमंतकः
इति॥ माघशुक्लचतुर्थी तिलचतुर्थी॥ तदुक्तं काशीखंडे॥ माघशुक्लचतुर्थ्यां तु नक्तव्रतपरायणाः॥ ये त्वां
ढुंढे चार्चयिष्यंति तेऽर्च्याः सुरासुरैर्ध्रुवं॥ विद्यावतार्थिकी यात्रा चतुर्थी व्याप्य तापसी॥ शुक्लान् तिलान्दु
दुर्वीध्वा प्राश्नीयाल्लड्डुकान्नरो॥ तापसी माघी॥ अनन्तकमहत्प्राप्त्यै दोषव्यापिनी माहोमिति हूः॥ इ
ति चतुर्थीनिर्णयः॥ अथ पंचमी॥ सा चतुर्थीयुतैव ग्राह्या॥ युगभूतानामिति युग्मवचनात्॥
पंचमी सप्तमी चैव दशमी च त्रयोदशी॥ प्रतिपन्नवमी चैव कर्त्तव्या संमुखी तिथिरिति पैठीन
सिवचनात् संमुखी सायाह्नव्यापिनी॥ व्रतं वैवर्ते॥ प्रतिपत्पंचमी भूतसावित्री वटपूर्णिमा॥ न
वमी दशमी चैव नोपोष्याः परसंयुता॥ माधवीये॥ पंचमी च तथा कार्या चतुर्थीसहिता विभो॥
चैत्रादिमास पंचम्यादयः कल्पादयः॥ अतोऽतिवाचनात्स्ये॥ व्रतमोपवासोदिनस्यादिः कल्पा
दिः सप्त कीर्तिताः॥ वैशाखस्य तृतीयायां कृष्णा फाल्गुनस्य च॥ पंचमी चैत्रमासस्य तस्यै
वांत्या तिथिः परा॥ शुक्ला त्रयोदशी माघे कार्तिकस्य तु सप्तमी॥ नवमी मार्गशीर्षस्य सप्तैताः सं

ध

स्मराम्यहं॥ कन्यानामादमोहेनादत्तस्याक्षयकारकाः। तस्यैवां प्राज्यैत्रस्यैवामावास्या॥ अत्रैताः
शुक्लाः पौर्वाह्णिक्यः कृष्णा अपराह्णिका वृत्तियुगादिवज्ज्ञेयाः। शुक्लपक्षे तिथिर्ग्राह्या यस्याम
भ्युदितो रविः। कृष्णपक्षे तिथिर्ग्राह्या यस्यामस्तंगतो रविरिति वाक्यात्। अत्र पक्षविशेषानुपा
दानेप्युक्तो ह्ये यः। श्रावणशुक्लपंचमी नागपंचमी उच्यते। सा च परा विद्धा ग्राह्या। तदुक्तं चमत्का
रचिंतामणौ। पंचमी नागपूजायां कार्या षष्ठीसमन्विता॥ तस्यां तु तुषिता नागा इतरा सच
तुर्थिकेति मदनरत्ने स्मृत्यंतरे च॥ श्रावणे पंचमी शुक्ला संप्रोक्ता नागपंचमी। तां परित्यज्य
पंचम्यः चतुर्थी सहिता हिता इति॥ अत्र पंचमी त्रिमुहूर्ता कर्तव्यमुक्तं काशीखंडे। यः स्नातो
नागपंचम्यां कुंडे वासुकिसंज्ञके। न तस्य विषसंसर्गो भवेत्सर्पसमुद्भवः॥ कर्तव्या नागपंचम्यां
यात्रा वर्षासु तत्र वै। नागाः प्रसन्ना जायंते कुले तस्यापि सर्वदेति भविष्ये॥ श्रावणे मासि पंच
म्यां शुक्लपक्षे नराधिप॥ द्वारस्योभयतो लेख्या गोमयेन विषोल्बणाः॥ पूजयेद्विधिवद्वीर दधिदू

२५

वांकुरैः कुशैः। गंधपुष्पोपहारैश्च ब्राह्मणानां च तर्पणैः॥ ये तस्यां पूजयंतीह नागान् भक्तिपुरःस
राः। न तेषां सर्पतो वीर भयं भवति कुत्रचित् इति॥ भाद्रे शुक्लपंचमी कृषिपंचमी सोच्यते॥ तदुक्तं
ब्राह्मे। नभस्ये शुक्लपक्षे तु यदा भवति पंचमी॥ नद्यादिके तथा ताले तडागे वापि सुस्नायेच॥ ब्राह्म
णो क्षत्रियो वैश्यः शूद्रो वापि वरानने॥ कृत्वा नैमित्तिकं कर्म गत्वा निजगृहं पुनः॥ वेदिं सम्यक् प्रकु
र्वीत गोमयेनोपलिप्य तां॥ रेखावल्लीसमायुक्तां नानापुष्पोपशोभितां॥ तत्र सप्त ऋषीन् दिव्यान् भक्ति
युक्तान् प्रपूजयेत् इति॥ तत्र पंचमी मध्याह्नव्यापिनी ग्राह्या। पूजाव्रतेषु सर्वेषु मध्याह्नव्यापिनी तिथि
रिति माधवीये हारीतोक्तेः॥ उभयदिने तद्व्याप्तावव्याप्तौ वा पूर्वा। युग्मवाक्यात्॥ आश्विनशुक्लपं
चम्यां उपांगललिताव्रतं॥ तत्तु यद्यपि महानिबंधेष्वनुक्तं। तथाप्यतिप्रचुरत्वान्निर्णीयते। तत्र
पंचमी मध्याह्नव्यापिनी ग्राह्या॥ तत्रैव पूजाविधानात्॥ माधवीये स्मृत्यंतरेऽपि। पूजाव्रतेषु स
र्वेषु मध्याह्नव्यापिनी तिथिरिति॥ मार्गशुक्लपंचम्यपि नागपंचमी॥ शुक्ले मार्गशिरे पुण्या श्रा
वणे या च पंचमी॥ स्नानदानैर्बहुफला नागलोकप्रदायिनी इति हेमाद्रौ स्कांदात्॥ इयमपि पर

युतैव ग्राह्या।।पंचमी नागपूजायां कार्या षष्ठीसमन्वितेति पूर्वोक्तवचनात्।।इति पंचमीनिर्णयः।।
अथ षष्ठी।।सा तु सावैरूपवासव्रतादिषु स्कंदव्रतातिरिक्ता सप्तमी युतैव ग्राह्या।षण्मुन्योरि
ती युग्मवाक्यात्।।माधवीये स्कांदेपि।।नागविद्धा न कर्त्तव्या षष्ठी चैव कदाचन।सप्तमीसंयुता का
र्या षष्ठी धर्मार्थचिंतकैरिति।।अत्र पंचमीवेधः षण्मुहूर्त्तात्मको ज्ञेयः।नागो द्वादशनाडीभिर्दू
षयत्युत्तरां तिथिमिति वचनात्।तेन षण्मुहूर्त्तन्यूनपंचमीयोगे परदिने च सप्तमीविद्धषष्ठ्य
भावे पूर्वैव।अस्यामेव रविवासरयोगे लोलार्कयात्रोक्ता काशीखंडे।कृतानि यौधानि नरैः सं निपा
वत्सरादपि।नश्यंति क्षणतः स्नानात्षष्ठ्यर्के लोलदर्शनात्।लोलो लोलार्कः।वार्षिकपा
त्राप्युक्ता तत्रैव।मार्गशीर्षस्य सप्तम्यां षष्ठ्यां वा रविवासरे।विधाय वार्षिकीं यात्रां नरः पा
पात्प्रमुच्यते इति।।आषाढशुक्लषष्ठी स्कंदषष्ठीत्युच्यते।।सा पंचमीयुता ग्राह्या।तदुक्तं स्कां
दे।कृष्णाष्टमी स्कंदषष्ठी शिवरात्रिश्चतुर्दशी।।एताः पूर्वयुताः कार्यास्तिथ्यंते पारणं भ

२७

वेदिति॥ भाद्रकृष्णषष्ठीयोगविशेषे कपिलाषष्ठी सूच्यते॥ तदुक्तं पुराणसमुच्चये। भाद्रे मास्यसिते
पक्षे भानौ चैव करे स्थिते॥ पाते कुजे च रोहिण्यां सा षष्ठी कपिला भवेत्॥ संयोगे तु चतुर्णां तु नि
र्दिष्टा परमेष्ठिना। वाराहपुराणे। नभस्ये कृष्णपक्षे तु रोहिणीपातभूसुतैः॥ युक्ता षष्ठी पुरा
प्रोक्ता कपिला परिकीर्तिता। व्रतोपवासनियमैर्भास्करं तत्र पूजयेत्॥ कपिलां च द्विजाग्र्या
य दत्वा क्रतुफलं लभेत्। अन्यत्र हेमाद्रौ स्कान्दे। प्रौष्ठपदासिते पक्षे षष्ठी भौमेन संयुता। व्यती
पातेन रोहिण्या सा षष्ठी कपिला स्मृता। द्वितीया तु महापुण्या व्रतीनां दुर्लभा क्वचित्। षष्ठी संवत्स
रस्यान्ते सा पुनस्तेन संयुता॥ चैत्रे वैशाखयोर्मध्ये सिते पक्षेऽभ्युदये। वैशाखे पिचराजेन्द्र द्वार
वसां परास्मृता॥ मार्गशुक्ले च या षष्ठी। तस्यां स्कंदे सदा पास्य महलक्ष्मीरिपूजा ब्राह्मणभोजनादि म
ल्लारिमहात्म्ये दाक्षिणात्येषु प्रसिद्धं॥ अस्या योगविशेषस्तत्रैवोक्तः॥ मार्गे भाद्रपदे शुक्ला षष्ठी वै
धृतिसंयुता। रविवारेण संयुक्ता सा चंपेतीह कीर्तिता। तत्र वैधृतियोगश्च भाद्रपदाभिप्रायेण। त

ध्या मार्गशीर्षे मलेपक्षे षष्ठ्यां वारेंशुमालिनः । शततारागते चंद्रे लिंगं स्याद्दृष्टिगोचरमिति । लिंगाद
र्शनं कार्यमित्यर्थः । एवं च योगविशेषेण पूर्वापरा वा ग्राह्या । तदभावे सप्तमीयुता कार्या । पूर्वोक्त सामा
न्यनिर्णयादिति दिक् ॥ इति षष्ठीनिर्णयः ॥ अथ सप्तमी ॥ सा सर्वत्र पूर्वैव षष्ठ्युग्मादिति युग्मवचना
त् ॥ स्कांदेपि ॥ षष्ठ्या युता सप्तमी च कर्तव्या तात सर्वदेति ॥ वैशाखशुक्लसप्तम्यां गंगापूजोक्ता ब्राह्मे ।
वैशाखशुक्लसप्तम्यां जह्नुना जाह्नवी स्वयं । क्रोधात्पीता पुनस्त्यक्ता कर्णरंध्रात्तु दक्षिणात् । तां तत्र पू
जयेद्देवीं गंगां गगनमेखलामिति । अत्र पूर्वाह्णव्यापिनी ग्राह्या । दिनद्वये साम्येन पूर्वाह्णगामित्वे पू
र्वा सामान्यनिर्णयात् । आश्विनशुक्लसप्तमी देवीपूजायां परयुता ग्राह्या । युगाद्या वर्षवृद्धिश्च सप्त
मी पार्वतीप्रिया । रवेरुदयमीक्षंते न तत्र तिथियुग्मतेति प्रतापमार्तंडमदनविध्योक्तेः । वर्षवृद्धिर्ज
न्मतिथिः ॥ अत्रैव मूलनक्षत्रे पुस्तकस्थापनमुक्तं रुद्रयामले । मूलऋक्षे सुराधीशपूजनीया सर
स्वती । पूजयेत्प्रत्यहं देवि यावद्वैष्णवमृक्षकं ॥ नाध्यापयेन्न च लिखेन्नाधीयीत कदाचन । पुस्तके

त्रि

२८

स्थापिते देवि घाकामोद्भजोत्तमः संगृहेपि। आश्विनस्य सिते पक्षे मेधाकामः सरस्वतीं। मूलेनावाहये
द्देवीं श्रवणेन विसर्जयेत्। माघशुक्लसप्तमी रथसप्तमीत्युच्यते। सारुणोदयव्यापिनी स्नानादौ ग्राह्या।
सूर्यग्रहणतुल्या तु शुक्ला माघस्य सप्तमी। अरुणोदयवेलायां तस्यां स्नानं महाफलमिति चंद्रिकायां
विष्णूक्तेः। अरुणोदयवेलायां शुक्ला माघस्य सप्तमी। प्रयागे यदि लभ्येत कोटिसूर्यग्रहैः समेति स्मृ
संतराज्ञा। दिनद्वये रुणोदये चेत्पूर्वैव। षष्ठ्युपोष्येति युग्मवाक्यात्। अत्र रूसंभविष्ये॥ सौवर्णे रा
जते ताम्रे मर्त्ये लांबुमयेतथा। तैलेन वर्तिदीप्तव्याम कुंकुमरंजिता। समाहितमना भूत्वा दद्यात्साशि
रसि दीपकं। भास्करं हृदये ध्यात्वा इमं मंत्रमुदीरयेत्। नमस्ते रुद्ररूपाय रसानांपतये नमः वरु
णाय नमःस्तेस्तु हरिवास नमोस्तु ते। जले परिहरेद्दीपं ध्यात्वा संतर्प्य देवता इति। महारजनं
कुसुंभं। परिहरेन्मुंचेत्। काशीखंडे विशेषः लोलार्के रथसप्तम्यां स्नात्वा गंगासिसंगमे॥ स
प्तजन्मकृतैः पापैर्मुक्तो भवति तत्क्षणादिति। इयं च षष्ठीरविवारसप्तमीयोगेतिफलदा। षष्ठी च स
प्तमी योगे वारश्चेदंशुमालिनः। योगोयं पद्मको नाम सहस्रार्कग्रहैः सम इति स्मृतिचंद्रोद

२८

येगर्गोक्तेः॥ अर्घ्यमंत्रश्च काशीखंडे। यदाजन्मकृतं पापं मया सप्तसु जन्मसु॥ तन्मे रोगं च शो
कं च माकरी हंतु सप्तमी॥ इति अर्घ्यदानमंत्रोन्यत्र। सप्तसप्तिवहप्रीत सप्तलोकप्रदीपन। स
प्तम्या सहितो देव गृहाणार्घ्यं दिवाकर॥ इति। ततः प्रार्थना। जननी सर्वलोकानां सप्तमी सप्तस
प्तिके। सप्तव्याहृतिके देवि नमस्ते सूर्यमंडले॥ इति॥ ॥इति सप्तमीनिर्णयः॥ अथाष्टमी॥
सा द्विधा पूर्वा शुक्लापरा ग्राह्या॥ शुक्लपक्षेष्टमी चैव शुक्लपक्षे चतुर्दशी॥ पूर्वविद्धा न कर्तव्या
कर्तव्या परसंयुता॥ इति॥ कृष्णपक्षेष्टमी चैव कृष्णपक्षे चतुर्दशी॥ पूर्वविद्धैव कर्तव्या परवि
द्धा न कुत्रचित्॥ उपवासेषु राजेंद्र एष धर्मः सनातनः॥ इति नैगमात्॥ सर्वास्वष्टमीषु भैरवया
त्रा काशीखंडे। अष्टम्यां च चतुर्दश्यां रविभूमिजवासरे॥ यात्रां च भैरवीं कृत्वा नरः पापैः
प्रमुच्यते॥ इति॥ तत्रैव। अष्टम्यां च चतुर्दश्यां भौमवारे विशेषतः। संपूज्य सततं कालराजं दु
र्गां दुर्गतिनाशिनीमिति। चैत्रशुक्लाष्टम्यां विशेषस्तत्रैव। चैत्राष्टम्यां महायात्रां भवान्याः

कारयेत्सुधीः॥ अष्टाधिकाः प्रकर्तव्याः शालकैः प्रदक्षिणा इति॥ पंचपद्युता [illegible]द्या॥ युग्म
वचनात्॥ श्रावणकृष्णाष्टमी द्वेधा॥ जन्माष्टमी जयंती च॥ तत्र केवला जन्माष्टमी॥ रोहिणी
युक्ता जयंती॥ तत्राद्योक्ता स्कांदे॥ अष्टमी श्रावणे मासि कृष्णपक्षे यदा भवेत्॥ कृष्णजन्माष्ट
मी ज्ञेया महापातकनाशिनीति॥ पुराणांतरेपि॥ श्रावणे बहुले पक्षे कृष्णजन्माष्टमीव्रतं॥ रा
त्रियुक्तां प्रकुर्वीत विशेषेणेंदुसंयुतामिति॥ जयंती तूक्ता वह्निपुराणे॥ कृष्णाष्टम्यां भवेद्य
त्र कलैका रोहिणी यदि॥ जयंती नाम सा प्रोक्ता उपोष्या सा प्रयत्नत इति॥ स्कांदेपि प्राजाप

५ सेन संज्ञा अष्टमी तु यदा भवेत्॥ श्रावणे बहुले सा तु सर्वपापप्रणाशिनी॥ जयं पुण्यं
च कुरुते जयंती तां विदुर्बुधा इति॥ शैवपुराणे शिववाक्यं शृणु वत्स प्रवक्ष्यामि अष्टमीभे
दनिर्णयं॥ श्रावणे कृष्णपक्षस्य घटिषष्टिर्यदा भवेत्॥ तदा जन्माष्टमी ख्याता संपूर्णा सा प्र ॥२६॥
कीर्तिता॥ रोहिणीऋक्षसंयुक्ता जयंती सा तु कथ्यते॥ जयंती यदि लभ्येत तत्र पुण्यं न
गण्यत इति॥ पाद्मे॥ प्रेतयोनिगतानां च प्रेतत्वं नाशितं नरैः॥ यैः कृता श्रावणे मासि अ

ष्टमी रोहिणी युता। किं पुनर्बुधवारेण सोमेनापि विशेषत इति। सोमः सोमवार इति केचि
त्। युक्तं तु चंद्रोदय इति। अर्द्धरात्रे तु योगोऽयं तारापत्युदये सतीति। विष्णुधर्मोत्तरे(के
मूलकल्पनालाघवात्। तत्र जन्माष्टमी नित्या। येन कुर्वंति जानंतः कृष्णजन्माष्टमीव्रतं।
ते भवंति नराः प्राज्ञ व्यालाः व्याघ्राश्च कानने इति स्कांदे अकरणे अनिष्टश्रुतेः। श्रावणे ब
हुले पक्षे कृष्णजन्माष्टमीव्रतं। न करोति महापापा व्याली भवति कानने इति भविष्ये च। ज
यंत्यपि नित्या कृष्णा च। नत्र तिसा स्कांदे। शूद्रान्नेन तु यत्पापं शवहस्तस्य भोजने। तत्पापं ल
भते कुंतिज यंती विमुखो नरः। न करोति यदा विष्णोर्जयंतीसंभवं व्रतं। यमस्य वशमाप
न्नः सहते नारकीं व्यथामित्यकरणे प्रत्यवायश्रवणात्। काम्याप्युक्ता स्कांदे॥ महाराज पार्थ
कुरु तां जयंतीं मुक्तयेऽथवा॥ धर्ममर्थं च कामं च मोक्षं च मुनिपुंगव। ददाति वांछितानर्था
न्ये चान्येऽप्यतिदुर्लभा इति फलविशेषश्रवणात्॥ अस्मिंश्च व्रते उपवासः पूजा चेत्युभयं प्र

धानं। जन्माष्टमीदिने प्राप्ते येन भुक्तं द्विजोत्तम। त्रैलोक्यसंभवं पापं तेन भुक्तं न संशयः इति
स्कांदात्। अर्द्धरात्रे तु रोहिण्यां यदा कृष्णाष्टमी भवेत्। तस्यामभ्यर्चनं शौरेर्हंति पापं त्रिज
न्मजं। सोपवासो हरेः पूजां कृत्वा तत्र न सीदतीति भविष्यपुराणाच्च। फलसंबंधावगमा
दिति नव्याः। तन्न। ऽचित्रोद्भिद्भन्निरपेक्षफलसंबंधात्प्रयोगभेदोपपत्तेः। नु पूर्वोदाहृते
षु वाक्येषु गौरवपरिजिहीर्षया केवलं फलसंबंध एव क्रियते। श्रावणे बहुले पक्षे कृष्ण
जन्माष्टमीव्रतं। न करोति नरो यस्तु भवंति क्रूरराक्षसः इत्यादिषु कालविधायकेषु भ
विष्यपुराणादिवचनेषु कृष्णजन्माष्टमीव्रतशब्देनोभयोरूपादानात् दर्शपूर्णमास
राजसूयादिवत् प्रयोगैक्यमिति चेन्न। प्रातिस्विकवाक्यैः पृथक् फलसंबंधऽद्भिचि
त्रादिवत्। परस्परनैरपेक्ष्येणेतिकर्तव्यतायाः अप्यन्वयात् भिन्न एव प्रयोगविधिः
कल्प्यते। एवं चैकशब्दोपादानमपि यदुष्मापण्णुनासोमेनेत्यादिवन्न विरुध्येत। अस्तु पृथ

३७

त ४

३७

कृप्रयोगगतेति चेन्न। अनंतरस्वकृतव्रतानुष्ठानपद्धतौ एकप्रयोगलेखनविरोधात्। तस्मा
त्सोपवासो हरेः पूजाभिसनंतरोपन्यस्ते मासि भाद्रपदे ष्टम्यां कृष्णपक्षेर्द्धरात्रके॥ शशांके
वृषराशिस्थे ऋक्षे रोहिणिसंज्ञके। योगेस्मिन्वसुदेवाद्धि देवकी मामजीजनत्। तस्मान्मां
पूजयेत्तत्र शुचिः सम्यगुपोषितः इत्यादावुपवासस्य गुणत्वप्रतीतेः। सदनोधावतीसाध्विव
फलसंस्कारः पूजैव प्रधानं। एवं चोपवासस्य पारार्थ्ये निर्णीते पत्स्वध्यायेफलोल्लेखः स
केवलं स्तावक एव पर्णताद्विरतः। अंगे फलश्रुतिरर्थवाद इति न्यायात्। ननु वासुदेवं
समभ्यर्च्य सर्वपापप्रशांतये। उपवासं करिष्यामि कृष्णाष्टम्यां नभस्यहं। अद्य कृष्णाष्टमी
देवीं नभश्चंद्रसरोहिणी। अर्चयित्वोपवासेन भोक्ष्येहमपरेहनि। इति भविष्योक्ते संकल्पवा
क्ये उपवासस्य कर्तव्यत्वेनोल्लेखात्सोपि प्रधानमिति चेन्न। अंगलेष्वुपवासस्य क्रियां क्रिया
संबंधिनं वा प्रकाशयन्मंत्रः करणत्वं भजत इति न्यायात् क्रियासंबध्युपवासप्रकाशकत्वे

नापिमंत्रस्यकरणस्यकरणत्वोपपत्तेः।उपवासेनेत्युपलक्षणेतृतीया।उपवासस्यपूजाकर
णत्वासंभवात्।नतुपूर्वोदाहृतयोःपूजाफलसंबंधबोधकवाक्ययोरकरणनिंदार्थवादादे
रभावात्कथंव्रतस्यनित्यत्वोक्तिरितिचेन्न।उक्तयुक्त्यापूजायाएवफलसंबंधेपूर्वोदाहृतेषु
श्रावणेवाबहुलेपक्षेकृष्णाद्दिवाक्येषुकृष्णजन्माष्टमीव्रतशब्देनपूजायाग्रहणात्तद्युक्तेःकर
लंस्यार्थवादश्रवणान्नित्यत्वोपपत्तिः।तस्मादुपवासोऽगंपूजैवतुप्रधानं।अस्याश्चपूजा
याःकालउक्तोविष्णुधर्मे।रोहिणीसहिताकृष्णामासिभाद्रपदेऽष्टमी।।सप्तम्यामर्द्धरात्रा
धःकलयापियदाभवेत्।।तत्रजातोजगन्नाथःकौस्तुभीहरिरीश्वरः।तमेवोपवसेत्कालंत
त्रकुर्याच्चजागरं।।अर्द्धरात्रेतुयोगोयंतारापत्युदयेतथा।नियतात्माशुचिःस्नातःपूजांत
त्रप्रवर्त्तयेदिति।।वचनस्थस्तुशब्दोऽर्द्धरात्रस्यमुख्यकालत्वमाह।।अष्टमीरोहिणीयुक्तानिश्च
र्द्धेदृश्यतेयदि।मुख्यकालःसविज्ञेयस्तत्रजातोहरिःस्वयमिति।मुख्यस्यप्रधानस्यका

लौ मुख्यकालः अत्र केवलाष्टमी चतुर्द्धा। पूर्वेद्युरेव निशीथव्यापिनी परेद्युरेवो भयेद्युर्नोभ
येद्युश्चेति। तत्र प्रथमद्वितीयपक्षयोः कर्मकालव्यापित्वेनासंदिग्धैव। अंत्ययोरपि पक्षयोः
प्रातःसंकल्पकाले सत्वादाधिक्यमपरैव। ब्रह्मवैवर्त्तेपि। वर्जनीया प्रयत्नेन सप्तमीसंयुता वै
ष्टमीति। रोहिणीयुतापि चतुर्द्धा। पूर्वेद्युरेव निशीथयोगवती। परेद्युरेव तादृशी। उभयेद्युर्नोभ
येद्युश्चेति। तत्र पूर्वेद्युर्निशीथयुता पूर्वैव। कार्याविद्धापि सप्तम्या रोहिण्या सहिताष्टमीति पा
मी द्मात्। सप्तमीसंयुताष्टम्यां निशीथे रोहिणी यदि। भविता साष्टमी पुण्या यावच्चंद्रदिवाकरावि
ति वह्निपुराणात्। जयंत्यां पूर्वविद्धायां उपवासं समाचरेदिति गारुडाच्च। भविष्ये विष्णु
धर्मोत्तरे च। रोहिण्यामर्द्धरात्रे च यदा कृष्णाष्टमी भवेत्। तस्यामभ्यर्चनं शौरेर्हंति पापं त्रिज
न्मजं॥ प्राजापत्यर्क्षसंयुक्ता कृष्णा नभसि चाष्टमी। सोपवासो हरेः पूजां कृत्वा तत्र न सीदति॥
अर्द्धरात्रे तु योगोयं तारापत्युदये तथा। नियतात्मा शुचिः स्नातः पूजां तत्र प्रवर्त्तयेत्। रोहिणी

३२

सहिता कृष्णा मासि भाद्रपदेऽष्टमी॥ अर्द्धरात्रादधश्चोर्द्ध्वं कलयापि यदा भवेत्। तत्र जातो जगन्ना
थः कौस्तुभी हरिरीश्वरः। तथा सप्तमीयोगे तु रोहिण्यां निशीथे राजसत्तम। समजायत गोविंदो
बालरूपी चतुर्भुजः। तस्मात्तं पूजयेत्तत्र निशीथे राजसत्तमेति॥ अत्र शिष्टेषु त्रिषु परदि
न एव व्रतं। तत्तु कृतं ब्रह्मवैवर्ते। वर्जनीया प्रयत्नेन सप्तमीसहिताष्टमी। सऋक्षापि न कर्तव्या
सप्तमीसंयुताष्टमीति। स्कांदे॥ सप्तमीसहिताष्टम्यां भूत्वा ऋक्षं द्विजोत्तम। प्राजापत्यं द्वितीये
ऽपि मुहूर्त्तार्द्धं भवेद्यदि॥ तदाष्टयामिकं ज्ञेयं प्रोक्तं व्यासादिभिः पुरा। पाद्मे। मुहूर्त्तेनापि संयुक्ता
संपूर्णा साष्टमी भवेत्। किं पुनर्नवमीयुक्ता कुलकोट्यास्तु मुक्तिदेति। यदा तु पूर्वेद्यु रोहि
णीरहिता निशीथगा च तिथिः परेद्युश्च रोहिणीसहिता निशीथाऽस्पृक् च तदा पूर्वैव ग्राह्या।
कर्मकालव्याप्तस्य सर्वापेक्षया प्राबल्यस्य सर्वग्रंथसिद्धत्वात्। रोहिणीयोगे तु प्राशस्त्या
त्फलातिशयमात्रं न तु तस्या निर्णयोपयोगिता। नवमीबुधवारवत्। अन्यथा प्रेतयोनि
गतानां तु प्रेतत्वं नाशितं नरैः। यैः कृता श्रावणे मासि अष्टमी रोहिणीयुता॥ किं पुनर्बुधवा

रेणसोमेनापिविद्धेस्यात्ः।किंपुनर्नवमीयुक्ताःकुल्पकोधास्तुमुनिर्देतिपाद्मवचसापूर्वैर्युरर्द्धू
रात्रेवर्त्तमानांसरोहिणीमप्यष्टमीसत्त्वाबुधनवमीयुतापरैवकार्यापद्येत।यत्तुपुनर्नव्याः
सत्संकर्मकालव्याप्त्यंसर्वापेक्षयाप्रबलंतथापीयमस्मिन्पक्षेपरैवग्राह्येत्येवंविधेनप्राति
स्विकेनशास्त्रेणबाध्यते।अतएवविष्णुरहस्ये।प्राजापत्यर्क्षसंयुक्ताकृष्णानभसिचाष्टमी॥
मुहूर्त्तमपिलभ्येततसोपोष्यासामहाफलेति॥वह्निपुराणेपि॥कृष्णाष्टम्यांभवेद्यत्रकलैका
रोहिणीस्मृता।जयंतीनामसाप्रोक्ताउपोष्यैवप्रयत्नतः।स्कांदेऽप्युदयेचाष्टमीकिंचिन्नवमीसक
लायदि॥भवेत्तुबुधसंयुक्ताप्राजापत्यर्क्षसंयुता॥अपिवर्षशतेनापिलभ्यतेयदिवानवेति।व
ह्निवैवर्त्ते।दिवावायदिवारात्रौनास्तिचेद्रोहिणीकला।रात्रियुक्तांप्रकुर्वीतविशेषेणेंदुसंयुता
मिति॥प्रातिस्विकशास्त्रस्यकर्मकालशास्त्रापेक्षयाप्राबल्यंमाधवाचार्यादिभिर्व्यवस्था
पितमेवेत्याहुः।तदपिन।तद्वाहिप्रातिस्विकंशास्त्रंकर्मकालबाधकंयदन्यथासिद्धं

न१

३३

भवति॥ संभवति तस्य न्याय्यो न्यायोर्थः। तदाहि॥ यत्तावद्ब्रह्मवैवर्त्ते यच्चेंदुसंयुताभिसस्य सोमेनापि
विशेषतइसनेनैकमूलकल्पनालाघवलिप्सया सोमवारपरत्वान्नास्य दिवावच्छेदेन रात्र्यव
च्छेदेन वा रोहिणीकृतायोगाभावे निशीथव्यापिनी ग्राह्येत्ययमर्थः निशीथगमकशब्दाभावा
त्। किंतु सोमवारयुक्ताविशेषेणाधिकेन रात्रियुक्तत्वाद्ग्राह्येति। एवं चोभयदिने निशीथस्पर्शा
भावे सोमवाराधिकरात्रिव्याप्तेर्निर्णायकत्वमुक्तं भवति। यद्वा॥ इंदुसंयुताभिसस्य निशीथ
परत्वेपि रात्रिपदेनैवाधिकां रात्रिं लक्षयित्वाऽहोरात्रावच्छेदेन कल्पयापि रोहिणीयोगाभा
वेऽधिकरात्रिव्यापिनीं कुर्वीतेत्युक्तविशेषेणोक्तादिना तद्द्योत्यते॥ सप्तमि रोहिणीयोगे
इंदुसंयुते च ग्राह्येति। अथवा निशीथस्य मुहूर्तमात्रात्मकत्वात्तदुभयदिने वैषम्येऽपि नि
शीथस्य स्पर्शोऽहोरात्रे रोहिणीयोगाभावे च विशेषेणाधिकेनेंदुसंयुक्ता निशीथग्राह्या।
अधिकनिशीथव्यापिनीति यावत्। रोहिणीयोगे त्वधिकनिशीथव्यापिनीमपि विहाय स्व
ल्पनिशीथयोगिनी रोहिणीयुक्तामेव कुर्वीतेति। यत्तु स्कांदे मुदये चाष्टमी किंचिदिति। न त्वापु

श्री

३३

रुपद्वाद्रस्यतारापकदये सतीसाधकमूलकल्पनालौव[illegible]लिकस्यापाचंद्रोदयपरत्वेवांग्नीका
र्था। न सूर्योदयपरता॥ यद्दिने वं न व्याख्यायते यतो यथाश्रुतवाक्यबलाद्यदा पूर्वेद्युर्निशीथेष्टमीमा
त्रसत्वमुत्तरेद्युश्च निशीथाख्यार्धरात्र्यष्टमी रोहिणीयुक्ता च सती यदा बुधयुक्ता तदैवोत्तरा स्यान्न तु
तदभावे। यावद्वचनं वाचनिकमिति न्यायात्॥ यद्दिने तु बुधाभावेपि रोहिणीमात्रवशाद्दैवोत्तरोच्य
ते तदा रोहिणीयोगाभावेपि बुधमात्रस्य सद्भावादुत्तरा स्यात्॥ अन्यतरापायेप्येतद्वचनप्रवृत्तेः
स्वीकारणात्। ऋक्षयोगवद्वारयोगस्यापि प्राशस्त्यहेतुत्वाच्च॥ अतो द्वैजरतीयापत्तिः॥ किं च। यथा पू
र्वेद्युर्निशीथेष्टमीमात्रसत्वेऽत्तरेद्युश्च निशीथात्पूर्वमृक्षयोगे बुधसत्वे चैतद्वचनादुत्तरेद्युर्व्रतं। ए
वं पूर्वेद्युर्निशीथे सऋक्षाष्टमीसत्वेऽत्तरेद्युर्बुधाधिक्ये दुपवासापत्तिः प्रसंचिता चैतद्व्योव्याख्या द्वेतां
निर्णयेगुरुभिः। यच्च विष्णुरहस्यस्थं यदपि वह्निपुराण[illegible]तत्र मुहूर्तपदं निशीथाख्यमुहूर्तपरं
कलापदं तदूर्ध्वकलापरमिति न विरोधः। [illegible] न तु तद्व्यवद्धमुभयदिने निशीथेष्टमीव्याप्ताव

३८

न्यायाभावैकदेशव्याप्तौ वा साधकाभावात्तो न कर्मकालव्याप्तिबाधकं। न च कर्मकालशास्त्राबाधात्पूर्वै
व ग्राह्या। यदि तु जयंतीव्रतं जन्माष्टमीव्रतात् भिन्नं तदा तद्दूषणं तु परे ह्येव न तु जन्माष्टमीव्रतं। यत्तु माध
वाचार्यैर्जयंतीव्रतेन जन्माष्टमीव्रतस्य प्रसंगात्सिद्धिरभ्यधायि। तन्न। कालभेदात्। अपि च तयोर्देवता मो
भेदान्निमित्तभेदाद्रूपभेदाच्च निमित्तभेदान्निर्देशभेदाच्च कर्मभेद उक्तः। सोऽप्ययुक्तः। कर्मनाम
धेयभेदे हि स्यात्कर्मभेदः। न ह्यत्र जयंतीशब्दः कर्मनाम। किंतु रोहिणीसहिताया अष्टम्याः। रोहि
णी च यस्यां कृष्णपक्षेऽष्टम्यां द्विजोत्तम। जयंती नाम सा प्रोक्ता सर्वपापहरा तिथिरिति विरुद्धध
र्मान्तरात्। यदपि रूपभेदादित्युक्तं तत्र रूपशब्देन धात्वर्थभेदो गुणभेदो वाभिप्रेतः। नाद्यः कर्म
भेदसाधकत्वाऽभिक्षाधिकरणोपन्यासासंगतेः न ह्यामिक्षाधिकरणे धात्वर्थभेदाद्भेदः सि
द्धांति। नांत्यः। उत्पत्तिशिष्टस्य गुणस्य वा कर्मांतरत्वाभावात्। निमित्तभेदस्तु द्विमित्तभेदान्निर्देशभेदानां
तु कर्मभेदकत्वं नक्वापि दृष्टमिति। ननु जन्माष्टमीजयंती च शिवरात्रिस्तथैव च। पूर्वविद्धैव कर्तव्या

तिथिभांते पारणमिति भृगुवाक्ये॰ तस्यापरत्वपुनःश्रवणालक्षणाद्भ्यासादेव भेद इति चेन्न। एतस्य व
चसो जन्माष्टमीमत्स्यादिजयंत्यनुवादेन पूर्वविधेस्सगुणमात्रविधायकत्वेनाप्युपपत्तेः। अथ पूर्वो
दाहृतेषु वाक्येषूपवसेत्पूजयेच्चेत्यपर्यायधातुनिष्पन्नाख्यातानुरूपाख्यांतरादेव भेद इष्यते। तत्र ह्यु
क्तांतरेणोपवासपूजयोर्भेदेप्युपन्यासस्य पूजांगत्वस्य प्राक्स्थापितत्वेन तस्यानंश्रेण कालनि
यमप्रयोजकत्वं। प्रकरणांतरादेवेद इति चेन्न। उपोष्यमानस्मृतिपुराणादिषु असंनिध्यनुपलंभा ऊ
त्। यदि स्यात्तदा किमितीमं राजमार्गं विहाय यष्टुर्मिश्रत्वादिकुमार्गो माधवाचार्यैराश्रीयेत। एव
मपि स्वमात्रसाक्षिकत्वेन प्रकरणांतरादेवेदे समाश्रीयमाणे भवतु जयंतीव्रतं परेहुः। जन्माष्टमी
व्रते तु ससप्तुत्तरदिने निशीथाव्याप्तिन्या अष्टम्या रोहिणीयोगे पूर्वदिने च केवलायां निशीथयो
गे पूर्वैवमाहेति दिक्। अथ जन्माष्टमीव्रतप्रयोगः। व्रतपूर्वदिने दंतधावनं कृत्वोपवासदिने श्र
प्रातः सूर्यः सोमो यमः कालः संध्ये भूतान्यहःक्षपा। पवनो दिक्पतिर्भूमिराकाशं खचरा नराः

३५

प्रातःस्नात्वा नमास्थापकल्पध्वमिहसंल्लिखिलिमिरूकास्सफलपुष्पाक्षतंजलपूर्णं ताम्रपात्रमादाय
मासाद्युल्लिख्यामुकफलकामः पापक्षयकामो वा कृष्णप्रीतये कृष्णजन्माष्टमीव्रतं करिष्ये। तथा
वासुदेवं समुद्दिश्य सर्वपापप्रशान्तये। उपवासं करिष्यामि कृष्णाष्टम्यां नभस्यहं॥ अथ कृष्णा
ष्टमीं नभश्चंद्रसरोहिणीं। अर्चयित्वोपवासेन भोक्ष्येहमपरेहनि॥ एनसो मोक्षकामोस्मि यद्गोविं पभेइ
रेवी दत्रियोनिजं। तन्मे मुंचतु मां त्राहि पतितं शोकसागरे। आजन्ममरणं यावद्यन्मया दुष्कृतं कृ
तं॥ तन्नाशय गोविंद प्रसीद पुरुषोत्तम। रूकला वाच स्थंजलं क्षिपेत्। ततः कदलीस्तंभवासो
२ निराम्रपल्लवयुतसजलपूर्णकलशैर्दीपैः पुष्पमालाभिर्युतमगरुधूपितं अग्निखड्गकृष्ण
छागरक्षामणिद्वारन्यस्तमुसलादियुतं मंगलोपेतं षष्ठ्यादेव्याधिष्ठितं देवक्याः सूतिकागृ
हं विधाय तस्यास्समंताद्भित्तिषु कुसुमांजलीन् देवगंधर्वादीन् खड्गचर्मधरवसुदेवदेवकी
नंदयशोदागर्गगोपीगोपान् कंसनियुक्तान् गोधेनुकुंजरान्यमुनां तन्मध्ये कालियं अन्यच्च

तत्कालीनं गोकुलचरितं यथासंभवं लिखित्वा सूतिकागृहमध्ये प्रच्छदपटावृतं मंचकं स्थापयि
त्वा मध्याह्ने नद्यादिजलैस्तिलैः स्नात्वाऽर्द्धरात्रे सपरिवारश्रीकृष्णपूजां करिष्य इति संकल्प्य कांच
नी राजती ताम्री पैत्तली मृन्मयी तथा। वार्क्षी मणिमयी चैव वर्णकैर्लिखिता थ वे[illegible]कां स्थापयेत्
प्रतिमां विधाय अग्न्युत्तारणं तां प्रतिमा कपोलौ स्पृष्ट्वा तद्देवतानां मूलमंत्रं प्रणवादिचतुर्थ्यंतं नाम
वा अस्मै देवत्वसंख्यायै स्वाहेति च मंत्रं पठन् प्राणप्रतिष्ठां कुर्यात्॥ अस्मा[illegible]स्य स्वस्थाने तत्तद्देव
तानामग्नहां। गायद्भिः किंनराद्यैः सततपरिवृता वेणुवीणानिनादैः शृंगारादर्शकुंतप्रवर
कृतकरैः किंनरैः सेव्यमाना। पर्यंके स्वास्तृते या मुदिततरमुखी पुत्रिणी सम्यगास्ते सा देवी देव
माता जयति सुवदना देवकी दिव्यरूपा इति देवकीं। मां चापि बालकं मुग्धं पर्यंके स्तनपायिनं। श्री
वत्सवक्षसं शांतं नीलोत्पलैच्छ. विभाति श्रीकृष्णं च ध्यात्वा॥ ॐ नमो देव्यै श्रियै इति श्रियं। देवकी
सहितं वसुदेवं। यशोदासहितं नंदं। श्रीकृष्णसहितं बलदेवं। चंडिकां च। नमोंतैर्नाममंत्रैः पूज
येत्॥ तत्र मंत्रा योगेश्वराय देवाय योगानां पतये। [illegible] गोइवापतिसाय गोविंदाय नमो नमः।

जन्म

यो॰ ७

स्नाने। यज्ञेश्वराय देवाय तथा यज्ञोद्भवाय च॥ यज्ञानां पतये नाथ गोविंदाय नमोऽनमः। धूपादौ। वि
श्वेश्वराय देवाय तथा विश्वोद्भवाय च॥ विश्वस्य पतये तुभ्यं गोविंदाय नमो नमः। नैवेद्ये। गरुडे तु।
यज्ञाय यज्ञेश्वराय यज्ञपतये यज्ञसंभवाय गोविंदाय नमो नम इत्यर्घ्यं। सर्वेषां यज्ञपदानां स्था
ने योगपदे सुकृतायमेव मंत्रः। स्नाने। विश्वाय विश्वेश्वराय येत्यादि युक्तानैवेद्ये। धर्माय धर्मेश्वरा
येत्यादि। स्वाहांतस्तिलहोमे॥ विश्वाय विश्वेश्वरायेत्यादिः स्थापने। सोमाय सोमेश्वरायेत्यादि
श्चंद्रपूजायामभिमंत्रा उक्ताः ततो गव्यघृतेनाग्नौ वसोर्धाराः क्वचिदुच्यते नेति। ततो जात
कर्मनालच्छेदषष्ठीपूजा नामकर्माणि संक्षेपेण कार्याणि। ततश्चंद्रोदये रोहिणीयुतं चंद्रं स्थं
डिले प्रतिमायां च। नाममंत्रेण संपूज्य। शंखे तोयं समादाय सपुष्पकुशचंदनं। जानुभ्यां धर
णीं गत्वा चंद्रायार्घ्यं निवेदयेत्। क्षीरोदार्णवसंभूत अत्रिनेत्रसमुद्भव। गृहाणार्घ्यं शशांके
मं रोहिण्या सहितो मम। इति। ततो ज्योत्स्नायाः पतये तुभ्यं ज्योतिषां पतये नमः। नमस्ते रोहिणी
कांत सुधावास नमोस्तु ते। नमो मंडलदीपाय शिरोरत्नाय धूर्जटेः। कलाभिर्वर्द्धमानाय नमश्चं

द्वाथ चारवद्भूतिप्रणमेत्॥ ततः॥ अनघं वामनं शौरिं वैकुंठं पुरुषोत्तमं॥ वासुदेवं हृषीकेशं माधवं मधु
सूदनं। वराहं पुंडरीकाक्षं नृसिंहं दैत्यसूदनं। दामोदरं पद्मनाभं केशवं गरुडध्वजं। गोविंदमच्युतं देव
मनंतमपराजितं॥ अधोक्षजं जगद्बीजं सर्गस्थित्यंतकारिणं। अनादिनिधनं विष्णुं त्रिलोकेशं त्रिविक्रमं॥
नारायणं चतुर्बाहुं शंखचक्रगदाधरं। पीतांबरधरं नित्यं वनमालाविभूषितं॥ श्रीवत्सांकं जगत्से
तुं श्रीकृष्णं श्रीधरं हरिं। शरणं तु प्रपद्येहं सर्वकामार्थसिद्धये। प्रणमामि सदा देवं वासुदेवं जगत्पति
मिति मंत्रैः प्रणम्य त्राहि मां सर्वलोकेश हरे संसारसागरात्॥ त्राहि मां सर्वपापघ्न दुःखशोकार्णवात्प्र
भो। सर्वलोकेश्वर त्राहि पतितं मां भवार्णवे॥ देवकीनंदन श्रीश हरे संसारसागरात्॥ त्राहि मां सर्व
दुःखघ्न रोगशोकार्णवाद्धरे॥ दुर्गतांस्त्रायसे विष्णो ये स्मरंति सकृत्सकृत्॥ सोहं देवातिदुर्वृत्तस्त्रा
हि मां शोकसागरात्॥ पुष्कराक्ष निमग्नोहं मायाविज्ञानसागरे॥ त्राहि मां देवदेवेश त्वत्तो नान्योस्ति र
क्षिता॥ यद्बाल्ये यच्च कौमारे यौवने यच्च वार्द्धके। तत्पुण्यं वृद्धिमाप्नोतु पापं हर हलायुधेति मंत्रैः प्रार्थ

३७

येत्। ततः स्तोत्रपठनपुराणश्रवणादिना जागरणं कृत्वा द्वितीयेह्नि प्रातःकालीनं नित्यं कृत्वा पूर्ववद्देवं पूज
यित्वा ब्राह्मणान्भोजयित्वा तेभ्यः सुवर्णधेनुवस्त्रादि कृष्णो मे प्रीयतामिति दत्त्वा। यं देवं देवकी देवी वसु
देवादजीजनत्॥ भौमस्य ब्राह्मणो गुप्त्यै तस्मै ब्रह्मात्मने नमः। सुजन्म वासुदेवाय गोब्राह्मणहिताय च॥
शांतिरस्तु शिवं चास्त्विक्षुकाप्रतिमामुद्धास्य तां ब्राह्मणाय दत्त्वा पारणं कृत्वा व्रतं समापयेत्॥ सर्वाय स
र्वेश्वराय सर्वपतये सर्वसंभवाय गोविंदाय नमो नम इति पारणार्थं॥ भूताय भूतपतये इत्यादि समाप
ने च मंत्रः। उद्यापनमनुक्तत्वान्नास्ति एवं यथोक्त तिथौ व्रतं कृत्वा परदिने पारणं कुर्यात्॥ व्र[illegible]वर्तै॥ वै
अष्टम्यामथ रोहिण्यां न कुर्यात्पारणं क्वचित्। हन्यात्पुराकृतं कर्म उपवासार्जितं फलं। तिथिरष्टगुणं हं
ति नक्षत्रं च चतुर्गुणं॥ तस्मात्प्रयत्नतः कुर्यात्तिथिभांते च पारणमिति। तत्र दिवसे उभयांते पारण
मिति मुख्यः कल्पः एकतरांते स्वल्पः कल्पः। तत्र यदि तिथिनक्षत्रयोरन्यतरस्य वांतो रात्रौ भवति तदा त
द्रात्रौ न कुर्यात्किं तु दिवैव॥ सर्वेष्वेवोपवासेषु दिवा पारणमिष्यते॥ अन्यथा पुण्यहानिः स्याद्वते धारण

पारणमिति ब्रह्मवैवर्ते निषेधात्। अन्यथा तिथ्यंते रात्रौ तामसस्तेजसो दिवा। तामसे पारणं कुर्वीत तामसीग
तिमाप्नुयादिति गरुडपुराणाच्च। यत्तु केनचिदुक्तं। तिथिनक्षत्रयोगादिवा पारणस्यासंभवे रात्रावपि कार्यं।
तदुक्तं माधवीये स्मृत्यंतरे। तिथ्यृक्षयोर्यदा छेदो नक्षत्रांतमथापि वा। अर्धरात्रेऽथवा कुर्यात्पारणं त्वपरे
ह्नीति ब्रह्मांडपुराणेऽपि। न रात्रौ पारणं कुर्यादृते वै रोहिणीव्रतात्। तत्र निश्यपि तत्कुर्याद्वर्जयित्वा महानि
शामिति। पूर्वोदाहृतं तु सामान्यवाक्यद्वयं जन्माष्टमीपारणानिषिद्धकपारणापरमिति तन्न। ब्रह्मांडीयवच
नेतावदपि हि ब्रह्मवर्णादपि चेदंतगं रणादिति वत्सार्थस्यागेनोभयांतादरः प्रतीयते एवं च स्तुसमर्थसे
संभवति सामान्यवचनबाधकत्वमेतस्य युज्यते। यदापि तिथ्यृक्षयोरिति वचनं। तत्राप्येकं पदमेकत्रान्वि
तमन्यत्र चिनावलवदनुपपन्नानान्वेति न्यायादर्द्धरात्रे पद्मेभयांतस्तदा वचनांतरबोधिते दिन एव पा
रणं कुर्यादर्द्धरात्रे पारणमित्येव परं न्यायपश्यापंक्तौ तीये सिद्धः। यथा चमसमन्यां श्यामसां श्यामासिनो
भक्षयंति। अथैतस्य हारियोजनस्य सर्व एव लिंगं तदिदं सत्रं च मासिपदस्य हारियोजनान्वयानभ्युपग

३८

मात्॥ किंत्वयापिचपरेहनीसत्त्वाविवक्षांगीकृपतएव॥ अन्यथातत्तीयदिनेपारणापत्तिः पद्यत्रमाघवे
नोक्तं। अर्द्धरात्रशब्देनरात्रिमात्रंगृह्यतइति। तदपिप्रमाणाभावेनैवापास्तंप्रद्यविवक्षातदादितस्यैवग्र
हणौचित्यात्। तस्मादस्मदुक्तएवपक्षःश्रेयान्। तत्रशुक्लकृष्णयांतेऽश्वत्तस्त्वन्यतरांतेऽत्सवांतेवा। तिथ्यं
तेवोत्सवांतेवाव्रतीकुर्वीतपारणमितिकालादर्शादिनिबंधवचनात्। उत्सवांतेजागराद्युत्सवांते॥ भा
द्रशुक्लाष्टमीदूर्गाष्टमीभविष्ये। शुक्लाष्टमीतिथिर्यातुमासिभाद्रपदेभवेत्। दूर्गाष्टमीतुसाज्ञेयानोतरा

२

साविधीयतइति॥ इयंचपूर्वविद्धा। तदुक्तंहेघमेन॥ श्रावणीदुर्गनवमीदूर्वाचैवहुताशनी। पूर्ववि
द्धाप्रकर्तव्या शिवरात्रिर्बलेर्दिनमिति। अत्रचस्त्रीणामेवाधिकारोनपुंसां। यानपूजयतेदूर्गांमो
हाद्दहयथाविधि। जन्मानित्रीणिवैधव्यंलभतेनात्रसंशयः। तस्मात्संपूजनीयासाप्रतिवर्षंवधू
जनैरिति। चंद्रप्रकाशेपुराणसमुच्चयेऽकरणेवैधव्यरूपानिष्टश्रुतेः। अतएवनित्यमपीदं। इदं
चव्रतंभाद्रशुक्लेऽगस्त्योदयसंभावनायांभाद्रकृष्णाष्टम्यांकार्यं। शुक्लेभाद्रपदेमासिदूर्गासंज्ञान

३८

ष्टमी। सिंहार्के एव कर्त्तव्या न कन्यार्के कदाचन। सिंहस्थे योत्तमा स्यात्पैतृदिने मुनिसत्तमे इति
गोविंदार्णवे स्कांदात् अगस्त्योदयकालश्च द्वियोढाशीपैंडदेति माभ्यां हरिसंक्रमाद्रवेरेकाधिके
विंशतिमेह्यगंस्तः। अनंतसम्पुत्कं मदनरत्ने भविष्यपुराणे। मुश्चोद्देशे प्रजाता यां दूर्गायां ब्राह्मणो
त्तमाः। स्थाप्य लिंगं ततो गंधैः पुष्पैर्धूपैः समर्चयेत्। दध्यक्षतैर्द्विजश्रेष्ठ अर्घ्यं दद्यात्रिलोचने। दूर्वा
शमीभ्यां विधिवत्पूजयेत्कृत्वा युतां। तत्र मंत्रः। त्वं दूर्वेमृतजन्मासि वंदितासि सुरासुरैः। सौभाग्य
यं संततिं देहि सर्वकार्यकरी भव। यथा शाखाप्रशाखाभिर्विस्तृतासि महीतले। तथा ममापि सं
तानं देहि समजरामरमिति। भविष्यत्तियमोपि भविष्ये॥ अनग्निपक्वमश्नीयाद्दत्तं दधि फलं तथा॥
अक्षारलवणं ब्रह्मलक्ष्मीयान्मधुनायुतमिति। इयं च ज्येष्ठामूलभूत्यरोहिणामुहूर्त्तव्यापिनीग्रा
ह्या॥ मुहूर्त्ते रोहिणीष्टम्यां पूर्वा वा यदि वा परा। दूर्गाष्टमी तु सा कार्या ज्येष्ठां मूलं च वर्जयेदिति पुराणसमु
च्चयात्॥ दिनद्वये रोहिणे ज्येष्ठामूलयोगे तदभावे वा पूर्वैव। श्रावणी दुर्गनवमीति पूर्वोक्तवाक्यात्॥

अत्रैव ज्येष्ठापूजनं लैंगे। कन्यार्के चाष्टमी शुक्ला ज्येष्ठर्क्षे महती स्मृता। अलक्ष्मीपरिहाराय ज्येष्ठां तत्र
